महामहोपाध्यायश्रीसीरदेवकृतबृहत्परिभाषावृत्तेः

आचार्यश्रीशेषाद्रिसुधीकृतपरिभाषाभास्करस्य च तुलनात्मकमध्ययनम् ।

कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालये व्याकरणशास्त्रे **विद्यावारिधिः**

(Ph.D) इत्युपाधये रचयिष्यमाणस्य शोधप्रबन्धस्य रूपरेखा

(RESEARCH PROPOSAL)

संशोधकः

सत्यजितः विलासः खताळ

मार्गदर्शकाः

आचार्य. सी. जी. विजयकुमारः

अधिष्ठाता

वेदविद्या सङ्कायः,

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः

२०२०

विषयसूची-

अनुक्रमाङ्कः	**विषयः**
०१	प्रस्तावना
०२	विषयस्य महत्वम्
०३	पूर्वसंशोधनम्
०४	बृहत्परिभाषावृत्तेः परिचयः
०५	परिभाषाभास्करस्य परिचयः
०६	संशोधनोद्देश्यानि
०७	संशोधनपद्धतिः
०८	व्याप्तिः मर्यादा च
०९	अध्यायविभागः
१०	परिशीलनीयग्रन्थावलिः

1. प्रस्तावना-

संस्कृतभाषा विश्वस्य प्राचीनतमा श्रेष्ठा प्रेष्ठा च भाषा वर्तते। न केवलेयं भाषा अपितु विद्या वर्तते। एतस्याः विपुलवाङ्मयं वर्णनातीतम्। एतस्याः प्रशस्तं भव्यं च स्वरूपमद्यावधि स्वकीय-वैशिष्ट्येन विश्वमानसं मोहयति। संस्कृतविद्यायाः विशालभाण्डारागारे व्याकरणमेकमनुपमं रत्नं विद्यते। एतादृशं वैज्ञानिकं विस्तृतं च व्याकरणं विश्वस्मिन्जगति कस्याश्चिदपि भाषायाः नास्ति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणमिति व्युत्पत्या शब्दानां शुद्धस्वरूपस्य निष्पादनं व्याकरणस्य महत्वपूर्णं दायित्वम्। शब्दाः न केवलं ध्वन्यात्मकाः, अपितु परा वाग्रूपिणः ब्रह्मणोऽभिन्नाः सर्वैरभ्यर्थनीयाः। यथोक्तं पतञ्जलिना – एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्टुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति।[1] शब्दानां तत्वावबोधश्च व्याकरणादृते न भवितुमर्हति। उक्तं व भर्तृहरिणा "तत्वावबोधः शब्दानां नास्ति व्याकरणादृते।"[2] यद्यपि श्रूयन्ते अनेकानि व्याकरणानि तथापि सर्वेषु व्याकरणेषु पाणिनीय व्याकरणस्य प्राधान्यम् । पराशरोपपुराणेऽपि कथितम् –

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।

सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यन्न किञ्चन॥

अत एव पाणिनीयव्याकरणस्य महत्वं सर्वत्राङ्गीक्रियते। भगवान् पाणिनिः महेश्वरप्रसादाच्चतुर्दशसूत्राण्युपलभ्य अष्टस्वध्यायेषु विभक्तं सूत्रात्मकं व्याकरणं प्रणिनाय –

त्रीणि सूत्रसहस्राणि तथा नवशतानि च।

षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम्॥

---

[1] □□□□□□□□□□□

[2] □□□□□□□□□□□□

इदं व्याकरणं अष्टाध्यायीरूपेण प्रसिद्धम्। पाणिनेः सूत्राणामुपरि वार्तिककारेण कात्यायनेन वार्तिकानि रचितानि। तत्र च कृता उक्तानुक्तदुरुक्तानां चिन्ता। तस्यामष्टाध्याय्यां भगवतः पतञ्जलिना गभीरं रमणीयञ्च भाष्यं कृतम्। तदनन्तरम् आर्थिकप्रक्रियाभेदेन नैकेषां ग्रन्थानां रचना अस्मिन् शास्त्रे जाता। आर्थिकग्रन्थेषु तावत् दार्शनिकविषयविचाराः चर्चिता दृश्यन्ते। प्रक्रियाविषयिणी चर्चा प्रक्रियाग्रन्थेषु अवाप्यते।

व्याकरणशास्त्रे प्रारम्भादेव परिभाषाविषयिणी महती चर्चा प्रचलन्ती वर्तते। बहवः आचार्याः विपुलं साहित्यं निर्माय परिभाषा साहित्यं समृद्धं चक्रुः। मुख्यतया कात्यायन-पतञ्जलि-प्रमुखाणां व्याकरणशास्त्राचार्याणां ग्रन्थेभ्यः परिभाषाः उद्धृत्य सङ्कलिताः सन्ति। परितः सर्वतो भाष्यते आनया, सा परिभाषा, अथवा अनियमे नियमकारिणी परिभाषा इत्यपि उच्यते। परिभाषा सर्वं व्याकरणशास्त्रं तथैव उपकरोति यथा सुप्रज्वलितः दीपः सर्वं गृहं प्रकाशयति। काश्चन परिभाषाः पाणिनीयसूत्रैः सूत्रघटकपदैर्वा ज्ञापिताः सन्ति। एवं रीत्या काश्चन परिभाषाः ज्ञापकरूपाः काश्चन वाचनिक्यः काश्चन न्यायमूलाश्च समुल्लिखिताः सन्ति।

2. विषयस्य महत्वम्-

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥[3]

इत्येवम्प्रकारेण बुधाः यस्य शास्त्ररत्नस्य माहात्म्यं वर्णयन्ति, वेदपुरुषस्य मुखरूपेण वा यस्य परिगणनं भवति, भगवान् पतञ्जलिः यस्य शास्त्रस्य षड्ङ्गेषु प्राधान्यं मनुते तद्भवति सर्वविद्यानां प्रकाशकम् अपवर्गस्य द्वारमिव भ्राजमाणं शास्त्रं व्याकरणम्, एतादृशे सौत्रे व्याकरणे सूत्रवार्तिकादिभिस्सह सूत्रार्थप्रकाशिकां परिभाषां विना सूत्राणां कृत्स्नोऽर्थः ज्ञातुं न शक्यः। अत एव सूत्रार्थप्रतिपादिकां परिभाषामाधारिकृत्य बहवो व्याकरणाचार्याः बहून् ग्रन्थान् लिलिखुः। तेषु बृहत्परिभाषावृत्ति-परिभाषाभास्करयोः परिभाषाणां सम्यगध्यनं तत्रस्थविचारेषु

[3] □□□□□□□□□□□□

अवलोकितानां साम्यस्थलानां वैषम्यवतांस्थलानां तथैव हेतूनां परिशीलनम् आवश्यकं भाति। परिभाषाज्ञानस्य लिप्सूनां कृते एतच्छोधविषयः लाभाय कल्पेत।

3. पूर्वसंशोधनम्-

१. A comparative study of Paribhāṣās (Technical terms), as intimated by Vyāḍi and Nāgeśa. * Bhat,
Venkataramana Devaru * Bangalore, (In Progress)

२. Comparative study of the Paribhāṣāvṛtti and Paribhāṣenduśekhara. (S).
Sharma Keshavaprapan, 1978, Ph.D , Varanasi (Samp)

3. Paribhashavyakhyane Nilakanthadiksit Nagesh Bhattyoh matavedvimarshah,
Kandpal Naveen Chandra,
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

4. Paribhāṣā in Sanskrit grammar : A study.
Kumar Sesha, 1991, Ph.D, A. Andhra.

5. परिभाषेन्दुशेखरस्यभूतिविजयाटीकयोः कतिपयविशिष्टस्थलानां तुलनात्मकमध्ययनम्,
Shukla Ganeshkumar,
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

6. परिभाषेन्दुशेखरस्य भूतिटीकायाः समीक्षात्मकमध्ययनम्,
Dwivedi Astik,
Banaras Hindu University.

7. आचार्यहरिभास्करकृतपरिभाषाभास्करस्य आचार्यनागेशकृतपरिभाषेन्दुशेखरस्य च तुलनात्मकमध्ययनम्,

पाटीलः संभाजी विठ्ठलः, २०१५, Ph.D. राष्ट्रियसंस्कृतविद्यापीठम्, Tirupati.

8. व्याडिकृतस्य परिभाषासूचनस्य समीक्षात्मकमध्ययनम्,
Yogi Kamal Chandra,
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

4. बृहत्परिभाषावृत्तेः परिचयः –

ग्रन्थस्यास्य कर्तुर्विषये तस्य कालः निवासस्थानम्, अन्याः कृतयः इत्यादिषु विषयेषु अधिकं परिज्ञानं नोपलभ्यते इति तु खेदस्य विषयः। किन्तु ग्रन्थकर्त्रा ग्रन्थस्य उपसंहारवेलायां स्वनामोल्लेखः कृतः वर्तते। तद्द्वारा ग्रन्थकर्तुः परिचयः इत्थं वक्तुं शक्यः – महामहोपाध्याय-श्रीसीरदेवः इति अस्य नाम आसीत्। तेन परिभाषा विषयको यो ग्रन्थो विरचितः तस्य नाम वर्तते 'बृहत्परिभाषावृत्तिः' इति। ग्रन्थेऽस्मिन् १३० परिभाषास्सन्ति। ग्रन्थोऽयमष्टसु अध्यायेषु विभक्तो दृश्यते। प्रत्येकमपि अध्याये चत्वारः पादाः दृश्यन्ते। किन्तु अष्टमाध्यायादारभ्य पादक्रमो लुप्तो दृश्यते। अष्टमाध्याये केवलं तृतीयः पादः दृश्यते।

5. परिभाषाभास्करस्य परिचयः –

ग्रन्थस्यास्य कर्तुः परिचयः इत्थं वक्तुं शक्यः – श्रीशेषाद्रिनाथसुधीः शेषकुलतिलकायमानः च आसीत्। तेन परिभाषाविषयको यो ग्रन्थो विरचितः तस्य नाम वर्तते 'परिभाषाभास्करः' इति। ग्रन्थेस्मिन् १११ परिभाषाः सन्ति। ग्रन्थोऽयम् अध्यायेषु विभक्तः न दृश्यते। परिभाषा १ तः १११ पर्यन्तम् अध्यायक्रमे परिभाषाः न विभक्ताः दृश्यन्ते।

इत्येवं रूपेण बृहत्परिभाषावृत्तिग्रन्थे १३० परिभाषाः तथा परिभाषाभास्करग्रन्थे १११ परिभाषाः सन्तीति सङ्ख्याभेदः दृश्यते। बृहत्परिभाषावृत्तिग्रन्थः अष्टस्वाध्यायेषु विभक्तः तथा परिभाषाभास्करग्रन्थः अध्यायेषु विभक्तः न दृश्यते। बृहत्परिभाषावृत्तिग्रन्थे उल्लिखिताः "**आगमास्तद्गुणीभूतास्तदग्रहणेन गृह्यन्ते**" इत्यादयः परिभाषाः परिभाषाभास्करग्रन्थे नोपलभ्यन्ते तथा परिभाषाभास्करग्रन्थे उल्लिखिताः "**अनेकान्ता अनुबन्धाः**" इत्यादयः परिभाषाः

बृहत्परिभाषाग्रन्थे नोपलभ्यन्ते। एवं “**व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्**” इत्यादीनां परिभाषाणां कृतः विचारः उभयेष्वपि ग्रन्थेषु समानः एव दृश्यते।

6. संशोधनोद्देश्यानि-

व्याकरणशास्त्रे परिभाषामधिकृत्य बहवो ग्रन्थाः नानाचार्यप्रणीताः सन्ति, येषु अधिपरिभाषं भिन्नेव मौलिकी चर्चावाप्यते। अतः अधिजिगांसुभिः ते ग्रन्थाः अध्येयाः ज्ञेयाश्च। ते ग्रन्थाः यथा- आचार्यव्याडिकृतं **‘परिभाषासूचनम्’**, **’व्याडिपरिभाषापाठ’**, शाकटायन-**‘परिभाषासूत्राणि’**, **चान्द्रपरिभाषासूत्राणि**, दुर्गसिह्मकृता **‘कातन्त्रपरिभाषासूत्रवृत्तिः’**, भावमिश्रकृता **‘कातन्त्रपरिभाषासूत्रवृत्तिः’**, **’कातन्त्रपरिभाषासूत्रम्’**, **’कालापपरिभाषासूत्रम्’**, भोजदेवकृत **‘परिभाषासूत्राणि’**, श्रीपुरुषोत्तमदेवकृतः **‘परिभाषापाठः’**, श्रीसीरदेवकृता **‘बृहत्परिभाषावृत्तिः’**, नीलकण्ठदीक्षितविरचिता **‘परिभाषावृत्तिः’**, शीमच्छेषाद्रिसुधीकृतः **‘परिभाषाभास्करः’**, नागेशभट्टकृतः **‘परिभाषेन्दुशेखरः’** तथैव हरिभास्कराग्निहोत्रीकृतः **‘परिभाषाभास्करः’।**

महामहोपाध्यायश्रीसीरदेवकृता “बृहत्परिभाषावृत्तिः” इत्याख्यस्य ग्रन्थस्य श्रीशेषाद्रिनाथसुधीविरचितस्य “परिभाषाभास्करस्य” च तुलनात्मकमध्ययनं कृत्वा-

1. सिद्धान्तेषु अवलोकितानां साम्यस्थलानां वैषम्यवतांस्थलानां हेतुनाञ्च परीक्षणं करणीयम्।
2. कतरस्मिन् ग्रन्थे परिभाषा-अधिकृत्य मौलिक्याः चर्चायाः गाभीर्यं अवाप्यते इत्यस्य विचारो विधातव्यः।
3. बृहत्परिभाषावृत्तेः तुलनायां परिभाषाभास्करस्य किं वा स्थानं वर्तते इत्यध्येतव्यम्।
4. एतयोः ग्रन्थयोः परिभाषावाङ्मये किं योगदानं विद्यते इति विचारणीयं।

7. संशोधनपद्धतिः-

महामहोपाध्यायश्रीसीरदेवकृता बृहत्परिभाषावृत्तिः इत्याख्यस्य ग्रन्थस्य श्रीशेषाद्रिनाथसुधीप्रणीतस्य परिभाषाभास्करस्य च संशोधने तुलनात्मकपद्धतिरवलम्ब्यते।

8. व्याप्तिःमर्यादा च-

महामहोपाध्यायश्रीसीरदेवकृता बृहत्परिभाषावृत्तिः इत्याख्यस्य ग्रन्थस्य (१ तः १३० परिभाषाः) श्रीशेषाद्रिनाथसुधीविरचितस्य परिभाषाभास्करस्य (१ तः १११ परिभाषाः) च तुलनात्मकमध्ययनं कृत्वा एतयोः सिद्धान्तेषु अवलोकितानां साम्यस्थलानां वैषम्यवतांस्थलानां परीक्षणम्।

9. अध्यायविभागः-

शोधप्रबन्धेऽस्मिन् अध्यायविभागः इत्थं चिकीर्ष्यते।

- ❖ **प्रस्तावना**

I. **प्रथमोऽध्यायः**- परिभाषाशास्त्रम्, संशोधनविषयग्रन्थपरिचयः।
परिभाषाशास्त्रस्य स्वरुपम्,परिभाषाणां प्रकाराः,तासां व्याकरणशास्त्रस्थं महत्वमित्येतान् बिन्दून् आधारीकृत्य परिभाषावाङ्मयस्य विस्तृता चर्चा अत्र करिष्यते। बृहत्परिभाषावृत्तिग्रन्थपरिचयः तस्य वैशिष्ट्यं परिभाषाभास्करग्रन्थपरिचयः तस्य वैशिष्ट्यञ्च प्रस्तोष्यते। श्रीसीरदेवाचार्याणां श्रीशेषाद्रिनाथसुध्याचार्याणाञ्च परिचयोऽपि प्रस्तोष्यतेऽत्र।

II. **द्वितीयोऽध्यायः**- बृहत्परिभाषावृत्ति-परिभाषाभास्करग्रन्थयोः अष्टाध्याय्याः तृतीयाध्यायपर्यन्तं ज्ञापितानां परिभाषाणां तुलनात्मकमध्ययनम्।

III. **तृतीयोऽध्यायः**- बृहत्परिभाषावृत्ति-परिभाषाभास्करग्रन्थयोः अष्टाध्याय्याः चतुर्थपञ्चमषष्ठाध्यायपर्यन्तं ज्ञापितानां परिभाषाणां तुलनात्मकमध्ययनम्।

IV. **चतुर्थोऽध्यायः**- बृहत्परिभाषावृत्ति-परिभाषाभास्करग्रन्थयोः अष्टाध्याय्याः सप्तमाष्टमाध्याययोः ज्ञापितानां परिभाषाणां तथा न्यायसिद्धपरिभाषाणां तुलनात्मकमध्ययनम्।

V. **निष्कर्षः-**

- **ग्रन्थवैशिष्ट्यावलोकनम्-**

ग्रन्थयोरेतयोः ग्रन्थान्तरेभ्यो विद्यमानं भिन्नत्वं, ग्रन्थान्तराचर्चितानां किन्त्विहोपलब्धानां विषयाणां विचारः, ग्रन्थकर्तुः प्रतिपादनवैशिष्ट्यम् इत्यादयो विषयाः अत्र विशदीकरिष्यते।

- **उपसंहारः-**

शोधप्रबन्धे पञ्चसु अध्यायेषु प्रतिपादिताः विषयाः साररूपेणात्रोल्लेखिष्यते।

- **परिशिष्टानि-**

1. बृहत्परिभाषावृत्तिस्थपरिभाषासूची
2. परिभाषाभास्करस्थपरिभाषासूची
3. ग्रन्थद्वयगतपरिभाषाणां तुलनात्मकसूची
4. उपयुक्तग्रन्थसूची

10. परिशीलनीयग्रन्थावलिः-

1. '**परिभाषासङ्ग्रह**', श्री.के.व्ही.अभ्यंकर ,भाण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्युट,पुणे

2. '**वैयाकरणसिद्धान्तकौमुदी**', श्री.गोविन्दाचार्य,श्रीमद्भट्टोजिदीक्षितविरचिता श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता। चौखम्बा सुरभारती प्रकाशन,वाराणसी

3. '**अमरकोष**', रामाश्रमीभानुदिक्षितः, तारा पब्लिकेशन्स, वाराणसी

4. '**अष्टाध्यायी सूत्रपाठः**',महर्षि पाणिनिः, चौखम्बा ओरियण्टालिया, वाराणसी

5. '**परिभाषेन्दुशेखरः**',श्री.वासुदेव शास्त्री अभ्यङ्करः, भाण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्युट,पुणे

6. '**परिभाषेन्दुशेखर-भूति टीका**', श्री.रामकृष्णापटवर्धन तात्याशास्त्री, राजराजेश्वरीप्रेस, पुस्तकालय,दुर्गाघाट,वाराणसी

7. **’वाक्यपदीयम्’** श्री. भर्तृहरिः,चौखम्बा संस्कृत सीरीज,वाराणसी

8. **’वैयाकरणभूषणसारः’**,
प्रभादर्पणटीका,श्री.कौण्डभट्टः,सम्पा.बालकृष्णशास्त्री हरिवल्लभशास्त्री, चौखम्बा संस्कृत सीरीज,वाराणसी

9. **’व्याकरणमहाभाष्यम्’,** महर्षि पतञ्जलिः, व्याख्या.श्री.मधुसूदनप्रसाद मिश्र, चौखम्बा विद्याभवन, वाराणसी

10. **’व्याकरणशास्त्र का इतिहास’**, श्री. युधिष्ठिर मीमांसकः,रामलाल कपूर ट्रस्ट बहालगड् सोनीपत,हरियाणा

11. **’संस्कृत व्याकरण का उद्भव और विकास’,** आचार्य.सत्यकाम वर्मा, मोतीलाल बनारसी दास, जवाहरनगर दिल्ली

12. **’व्याकरण की दार्शनिक भुमिका’,** डा.सत्यकाम वर्मा, सुंशी राम मनोहर लाल, ५४ रानी झांसी रोड, नई दिल्ली-५

13. **’परिभाषेन्दुशेखर-बृहत्छास्त्रार्थकला,** पं.वेणीमाधव शास्त्री, चौखम्बा संस्कृत सीरिज आफ़िस, वाराणसी

- **अभ्यर्थना-**

“महामहोपाध्यायश्रीसीरदेवकृतबृहत्परिभाषावृत्तेः आचार्यश्रीशेषाद्रिसुधीकृतपरिभाषाभास्करस्य च तुलनात्मकमध्ययनम्।” इतीदमनुसन्धानं व्याकरणशास्त्रे नूतनतत्त्वान्वेषणे महदुपयुक्तं भवति। ईदृशमनुसन्धानं न केनापि इतः पूर्वं विहितम्। अतः प्रा.डा.सी.जी.विजयकुमारमहोदयानां मार्गदर्शने करिष्यमाणाय एतस्मै अनुसन्धानाय अनुमतिं प्रदाय मामनुगृह्णन्त्विति प्रार्थ्यते।

मार्गनिर्देशकाः	अनुसन्धित्सुः
आचार्य. सी. जी. विजयकुमारः	सत्यजितः विलासः खताळ
अधिष्ठाता	
वेदविद्यासङ्कायः	